CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
3 D P 13
Coll. No. 448

Title Kaivlyopaniṣad dīpikā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 448 Subject: Vedic lit

Title: Kaivlyopaniṣad dīpikā

Author: Śaṅkarācārya Bhagavataḥ Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 6.8" by 3.8" Extent: 28 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥माधवानंदसरस्वत्याइदंपुस्तकं॥

कै॰उ॰दी॰ ॥१॥

॥ श्रीपरमात्मने नमः ॥ परब्रह्मात्मने नमो नमः ॥ ॥

कैवल्याख्योपनिषदं कैवल्यार्थविबोधिनीं ॥ व्याख्यास्ये
केवलस्तेन कैवल्यात्माप्रसिद्धतु ॥ १ ॥ भगवती श्रुति
र्मतिवसुखप्रति पत्त्यर्थं कंच नाश्वलायनमृषीमु संगीकृत्य
ररीकृत्याख्यायिकामवतारयति ॥ ब्रह्मविद्यायामा
बुद्धि स्तिकानां यितुं ॥ रूपे साधन चतुष्टयसंपन्नं तं ॥ १ ॥

१ बुद्धिज १ अथेति

रं ॥ आश्वलायनं ऋग्वेदाचार्यः ॥ भगवंतं ब्रह्माणं तं ॥ परमे
ष्ठिनं सर्वोत्कृष्टस्थाननिवासिनं ॥ परिसमेत्य ॥ स्त्री
येन विधिना समीपमागत्य उवाच ॥ उक्तवान् ॥ अधी
हि मदनुग्रहार्थं स्मर ॥ भगवन् ॥ हे समग्रधर्मज्ञान
वैराग्यैश्वर्ययशः श्रीमन् ॥ ब्रह्मविद्यां ब्रह्मणो देश
कालवस्तु परिच्छेदशून्यस्य विद्यां बुद्धिं ॥ तस्मात् ज्ञानं

३ उपदिशेत्यर्थः ॥

२ब्रह्मज्ञानात्मनोरभेदाभिप्रायेणाह

के·उ·दी·
॥२॥

त्कारकारणतां वरिष्ठां अतिशयेन श्रेष्ठां सदानि
त्यंसन्निहितं हृदिध्यात्मबुद्धिमुनिभिः सेव्यमानां हृद
ये ध्रियमाणां निगूढां सर्वभूतेष्वात्मनो विद्यमा
नत्वेन विद्यमाना नितरा मप्यविद्यया नितरां सं
वृतां यया ब्रह्मविद्यया अचिरात् अप्रदीर्घेण
कालेन सर्वपापं निखिलदुःखकारणमज्ञानं ॥२॥

ससंस्कारं अपोह्य विविधं परित्यज्य विनाश्येत्यर्थः
परात्सर्वजगतः कारणादव्याकृतात् परं उत्कृष्टं
अज्ञानाश्रयविषयताभ्यां पुरुषं परिपूर्णं याति
प्राप्नोति विद्वान् अहमेव सोस्मीति साक्षात्कार
वान् एवं दृष्टः तस्मै स्वशिष्याय ब्रह्मविद्यार्थिने सः
गुरुः सर्वज्ञः ह किल उवाच उक्तवान् पिता

कै·उ·दी·
॥३॥

महस्य । जगत्स्रष्टॄणां हरादीनां पितापितामहः
कमलासनः । चकारोप्यर्थः । सपिताम
होप्युवाच । न तूपेक्षां कृतवानित्यर्थः । ब्रह्मविद्या
यां साक्षाद्धेतुमत्त्वात्तदर्थस्य च ब्रह्मणो वाश्व
नसातितत्वात् । अतः सोपायां तामाह । श्रद्धाभ
क्तिध्यानयोगात् । श्रद्धा आस्तिक्यबुद्धिः । भक्तिर्भ ॥३॥

२ श्रद्धेति

जनं तदेकतात्पर्यबुद्धिः । ध्यानं विजातीयप्रत्यय
शून्यसजातीयप्रत्ययप्रवाहः । एतेषां योगः संबं
धः एतत्कारणमिति यावत् । तस्मात्त्वेहि जानी
हि । इदानीं यथा श्रद्धाभक्तिध्यानयोगो ब्रह्मविद्या
यां कारणं तद्वत्संन्यासोपीत्याह । न कर्मणा श्रौते
न स्मार्त्तेन वा । न प्रजया पुत्रादिना । धनेन न दैवेन

२ न कर्मणेति

दैवेन वित्तेन देवतादिज्ञानेन ॥ मानुषेण वित्तेन। लौकिकसंव्यवहारेण विवाहादिना ॥

कै॰उ॰टी॰ ॥४॥ मानुषेणवा वित्तेनेनेति द्रष्टव्यमनुषज्यते ॥ ऽमृत
त्वमिति वक्ष्यमाणे[illegible]नुषंगः ॥ कर्मप्रजाधनप्रहेषु
ऽवगंतव्यः ॥ त्यागेन ॥ निखिलकर्म्मोत्तस्मात्सर्वकर्म्मप
रित्यागेन पारमहंस्याश्रमरूपेण ॥ एके महात्मानः ॥
संप्रदायविदः ॥ ऽमृततत्वं ऽविद्यादिमरणभाव
राहित्यं ऽआनशुः ॥ ऽआनशिरे प्राप्ताः ॥ एवं कृते सं ॥४॥

४ त्र स्थितमित्यर्थः

न्यासे ॥ परेण ॥ परस्तात् ॥ नाके ॥ कं सुखं ॥ तद्विरोधिदुः
खं ॥ ऽकं न विद्यते ॥ ऽकं यस्मिन्स नाकः ॥ तं स्वर्ग
स्योपरि इत्यर्थः ॥ अथवा परेण परं नाकं ॥ ऽआनंदा
त्मानं ॥ निहितं ॥ प्रतिष्ठितं ॥ सर्वं ॥ गुहायां बुद्धौ ॥ विभ्रा
जते ॥ विशेषेण स्वयंप्रकाशत्वेन दीप्यते ॥ यत् ॥ प्रत्यक्तत
सिद्धं ॥ विश्वव्यापि ॥ स्वरूपं ॥ यतयः कृतसंन्यासाः प्रय

सं

कै॰उ॰दी॰ ॥५॥

त्मवंतो ब्रह्मसाक्षात्कारं प्रपन्नाः। विशंति प्रविशंति
इदं वयं स्म इति साक्षात्कारेण तद्देव भवंतीत्यर्थः।
यतीनां विशेषणमाह। वेदांतविज्ञानसुनिश्चि
इति तार्थाः। वेदांताः प्रसिद्धाः। तेभ्यो जातं विशिष्टं। अहं
ब्रह्मास्मीति ज्ञानं तस्मिन्नेव सुनिश्चितोऽर्थः प्रयो मोक्षफलं
जनं येषां ते। अथवा सुनिश्चितोयमिच्छमेवेति ॥२॥

सम्यगवधारि[illegible]तो ब्रह्मलक्षणोऽर्थो विधेयो येस्ते वे
दांतविज्ञानसुनिश्चितार्थाः। संन्यासयोगात्। सम्य
क्काकविष्ठादिवत् लोकद्वयभोगसंन्यासः त्यागः
संन्यासः। तस्य योगोऽहं संन्या[illegible]स्यस्मीति बोधस्तस्मात् स्त
यतयः। आख्यातं। पुनराख्यानं विशेषणत्वकथनार्थं
शुद्धसत्वाः। शुद्धं रागादिकषायरहितं सत्वमंतःकर

कै॰उ॰दी॰ ॥ ६ ॥

णं । येषां ते शुद्धसत्वाः । एवंभूता अपि कृतनिश्चित्व
तिबंधादस्मिंशरीरेऽनुत्पन्न । साक्षात्कारश्चेत्त
हिते उत्क्रायंतयः । ब्रह्मलोकेषु ब्रह्मणः कार्यस्यैक
एव लोकोऽनेकभूमिकः प्रासादवत् । अधः उप
र्यादिविभागेनावस्थितो बहुवचनेनाभिधीयते ।
तेषु ब्रह्मलोकेषु परांतकाले । परस्य कार्यस्य ब्र ॥ द ॥

२ ब्रह्मज्ञानजन्यात्मतत्त्वसाक्षात्कारात्संसारान्मुक्ता भवंतीत्यर्थः

ह्मणः । अंतःकालो विनाशकालो द्विपरार्धावसानः
परांतकालस्तस्मिन् । परामृतात् । उत्कृष्टामरणध
र्मिणो ब्रह्मणः तात् परिमुच्यंति विमुच्यंते । सर्वतो वि
मुक्ता भवंति सर्वे निखिलाः । इदानीं ब्रह्मज्ञाना
वाप्त्यर्थं उपासनं कर्तुमुपवेशनार्थं देशविशेषा
दिकमाह । विविक्तदेशे च । एकांतप्रदेशे । शुभ्रासा

१ विविक्तेति

कै॰उ॰दी॰ ॥७॥

ह्याकुल कालेपि। सुखासनस्थः। सुखं स्वनुद्वेग
करं स्वस्थ्याद्यासनं सुखासनं तस्मिंस्तिष्ठतीति सु
खासनस्थः। शुचिः। बहिरंतःशौचवान्। समग्रीव
शिरःशरीरः। समानि ग्रीवा च शिरश्च शरीरं च प
स्य स समग्रीवशिरःशरीरः। ऋजुकायः। पद्मका
द्यासनस्थ इत्यर्थः। अत्याश्रमस्थः। अत्यंतधिको ब्रह्म ॥७॥

स्य चारिगृहस्थवानप्रस्थकुटीचकबहूदकहंसेभ्यः। आ
श्रमः पारमहंस्यलक्षणस्तस्मिंस्तिष्ठतीत्यत्याश्र ऽत्याश्रम
मस्थः। सकलेंद्रियाणि निखिलानि समनस्कानींद्रि
न कर्मेंद्रियाणि निरुध्य स्वस्वप्रचारेभ्योऽवरुध्य॥
भक्त्या देवबुद्ध्या हार्दिक्या। स्वगुरुं स्वस्य तत्त्वम
सीत्यर्थस्यावबोधकं प्रणम्य प्रकर्षेण नत्वानंत

के·उ·दी·
॥८॥

रं ॥ पुंडरीकं ॥ हृदयकमलं पंचच्छिद्रमिति विशेषणं ॥ वि
रजं ॥ विरजस्कं ॥ अपगतरागद्वेषादिकं ॥ विशुद्धं ॥ विग
तसमस्तदुःखादिदोषं ॥ विचिंत्य ॥ विशेषेण आत्मा
मध्ये हृदयपुंडरीकस्यांतः ॥ विशदं ॥ निर्मलं ॥ शु
द्धस्फटिकसंकाशमित्यर्थः ॥ विशोकं ॥ विगतशोकं ॥
विगतशोकजं दुःखं ॥ विशोकं ॥ आनंदरूपमद्व ॥८॥

यं स्मेराननं चेत्यर्थः ॥ वस्तु तत्त्व ॥ अचिंत्यं ॥ वाङ्मनसा
तीतत्वेन प्रत्ययसंततस्याविषयं ॥ वाङ्मनसातीतत्वे
हेतुः ॥ अव्यक्तं ॥ चाक्षाद्यशेषविशेषु अस्तत्वादस्पष्टं
रूपमव्यक्तं ॥ अप्रमत्तं परिच्छेदं वा प्रापति ॥ अनंतरूपं न वा
विधते तं तः इयत्तारूपाणां शरीराणां यस्यासौ अनंतरू
पस्तं ॥ देशकालवस्तुपरिच्छेदरहितं वानंतरूपं ॥ शि

कै॰उ॰टी॰ ॥९॥

यं मंगलरूपं प्रशांतं अविद्यादिदोषरहितं अप्रम
तं कालत्रयासंस्पृष्टं अप्रमत्त वद्यानिरतिशयानंद
रूपं ब्रह्म ब्रह्म सर्वस्मादप्यधिकं योनिं जगज्ज
न्मादिकारणं तथा यथैतद्विशेषणजातं तद्व्र
ह्ममपि आदिमध्यांतविहीनं उत्पत्तिपरिच्छेद
विनाशवर्जितं तत्र हेतुः एकं द्वितीय वस्तुमात्र ॥९॥

४ नीमासद्धायोयस्पतं

रहितं विभुं समर्थं व्यापिनं वा चिदानंदं स्वयंप्रका
शमानन्निरतिशयानंदं स्वरूपं चिदानंदव्यति
रिक्तरूपरहितं ततः अद्भुतं आश्चर्यकरं उमास
हायं उमा ब्रह्मविद्यारूपा भवा कामादिपाटच्चरर
हकं यद्वा उमा ईनारि शरीरं तेन वामांक स्थिता
भवानी अनुपमयुवतीरूपेण वा य सह सः

२ सत्यां ब्रह्मविद्यायां कुनरएव कामादिपाटच्चरावकाश इति भावः॥

कै॰उ॰दी॰
॥१०॥

उमासहायस्तं ॥ परमेश्वरं ॥ उत्कृष्टब्रह्मादिनियं
तारं ॥ प्रभुं समर्थं ॥ त्रिलोचनं ॥ त्रीणि सोमसूर्याग्न्या
त्मकानि लोचनानि यस्य स त्रिलोचनस्तं ॥ नील
कंठं ॥ हलकंठं ॥ प्रशांतं ॥ प्रशान्तवद्वनेंद्रियं ॥ ध्यात्वा
सजातीयप्रत्ययप्रवाहेण साक्षात्कृत्य ॥ मुनिः ॥ म
ननशीलः ॥ गच्छति प्राप्नोति ॥ भूतयोनिं ॥ आकाशादि ॥१०॥
त्रा

३ केवलस्यास्त्रीत्वाशयेनांदेत्यर्थः

महान्तकारणं ॥ तर्हि किंकारणत्वोपाधिकमित्यात्रा
हुने साह ॥ समस्तसाक्षिं ॥ सर्वसाक्षिणं ॥ सर्वबुद्धिप्र
चारद्रष्टारं ॥ साक्षित्वमपि न केवलस्येत्यत आह ॥ त
मसः ॥ आवरणविक्षेपशक्तिरूपायाः अविद्यायाः
परस्तात् ॥ परतः ॥ अविद्यासंबंधशून्यमित्यर्थः ॥ उमा
सहायो ॥ पासनात् ॥ प्राप्यो निरवद्यो विद्यादृशा

१ उमासहायोपासनात् याविद्यादशा तस्यां प्राप्यो योनिरवद्यः सगुणोपासने वस
त्वादसब्रह्मेत्यादिना ज्ञात्वा तं मृत्युमत्येतीत्यनेन

१ईश्वरस्यकार्यंजगतःकारणं

सएव१

कै॰उ॰दी॰ ॥११॥

योसर्वात्मित्मात्।सःउक्तः।ब्रह्माप्रथमशरीरीकार्य
कारणरूपः।सःउक्तः।शिवः।उमासहायः।सेंद्रः
संउक्तः।इंद्रस्त्रिलोकीपतिः।सःउक्तः।अक्षरःवि
नाशरहितः।परमः।उत्कृष्टः।स्वराट्।स्वेनैव स्व अन्यानपेक्षत्वेन
रूपेणराजतेप्रकाशते।सएव।उक्तः।एवविष्णुः।
व्यापनशीलः।शंखचक्रगदाधरः।सउक्तः।प्राणः। ॥११॥

२इतिस्वराट्

प्राणादिपंचवृत्तिरूपः।सःउक्तः।कालाग्निः।कालरू
पीवैश्वानरः।सःउक्तः।चंद्रमाः।शशांकः।सएव।उ
क्तः।एवसर्वंनिखिलंयत्अस्तिइदंभूतं।अतीतं।यच्च
यदपि।भव्यं।भावि।भाविच।कालत्रयवर्तमानमपि
सनातनं।चिरंतनं।ज्ञात्वा।अहमस्मीतिसाक्षात्कृत ब्रह्म
तंउक्तमानंआत्मानं।मृत्युं।अविद्यासंस्कारां॥

२ यदेत्यस्येति व्याख्यानमित्यग्रेणान्वयः

कै॰उ॰दी॰ ॥१२॥ त्यत्येति अतीत गच्छति । नान्यः । उक्तात् ब्रह्मज्ञानादन्य इति ना
रिक्तः । पंथाः । मार्गः । विमुक्तये । ब्रह्मज्ञानमृते मार्गांत
रं विमुक्त्यर्थं नास्ति इति शेषः । वैराजप्राणं विश्वतैज
स प्राज्ञानां विराट् । हिरण्यगर्भेश्वराणां वा स्वयंप्रका
ने शत्वेन लोचनं । प्रकाशस्वरूपं । त्रिलोचनं नीलं तमोऽ
ज्ञानं कंठे । कंठवच्छिरे । कदेशे । ऽधिकव्याप्तित्वेन चै ॥१२॥
त्रि २ त्रिस्त्रिति विश्वादि विराडादि निर्वालोचनं प्रकाशस्वरूपं त्रिलोचनं । चैतन्यस्या
धिकव्याप्तित्वेन नीलमज्ञानं कंठं कंठवच्छिरस्वरूपैकदेशे वर्तते यस्य स
नीलकंठस्तमिति व्याख्यानं ॥
उ३

२ ब्रह्मविद्यासत्वे ब्रह्मसाक्षात्कारो भवति नान्यथाऽत उक्तं ब्रह्मविद्यासहायं

तन्यस्य वर्तते यस्य स नीलकंठस्तमिति व्याख्यानं ॥
तदा विचारं रूपविद्यारहितं । विद्योके दुःखसंस्कारर
हितं । उमासहायं ब्रह्मविद्यासहायं । प्रशांतं पुनरु
त्थानसंस्कारवर्जितं इति । निर्गुणपरत्वेन समग्रैश्वर्या
समवगेतत्वं । निर्गुणस्याप्युपलब्धित्वेन । हृदयप्र
देशामध्यस्थत्वमविरुद्धं । तथा च ध्यातामननं निदि

१त्मे २भूतेषु

कै॰उ॰दी॰ ॥१३॥ ध्यासनेहत्वैतदुपपन्नमेव । सर्वभूतस्थं निखिले सर्वेषु
षु स्थावरजंगमेषु तिष्ठतीति सर्वभूतस्थः तं ॥ आत्मा
नम् अस्मत्प्रत्ययव्यवहारयोग्यं । सर्वभूतानि च निखि सर्वाणि
लानि स्थावराणि जंगमानि भूतानि सर्वभूतानि
च कार [illegible] आधाराधेयभावव्युत्क्रमार्थः । आत्मनि
आनंदात्मनि अहंप्रत्यययोग्ये संपश्यन् सम्यक् ॥१३॥

संशयविपर्ययम् अंतरेण अवलोकयन् । ततः तस्माद्धेतोः का
लवशात् परिसिद्धस्वरूपं । परमं । उत्कृष्टम् अनुपचरितम् इत्य
र्थः । याति प्राप्नोति । न याति । इति हेतुः । जीवप्रदीपन्यायेन
संबध्यते । न याति न प्राप्नोति । अन्येन उत्कृष्टबोधस्मृति
रिक्तेन हेतुना कारणेन । ध्यातारं गच्छति इति तस्य व्या
ख्यानं ज्ञात्वा तं इत्यादि । नान्यः पंथा विमुक्तये इत्यस्य

कै॰उ॰टी॰ ॥१४॥ आख्यानेनेदं सर्वज्ञत्वमित्यादि। यदा त्वेवं ज्ञानं
नोत्पद्यते। तदा तदुत्पादने उपायमाह। आत्मानं
अंतःकरणं अधरारणिं वह्निजनकं मंत्रसंस्कृतं काष्ठं
कृत्वा। अधो विधाय। अधरारणित्वेन चिंतयित्वेत्यर्थः।
मोंकारं प्रणवं चोत्तरारणिं। उत्तरारणिमपि च कारः। कृत्वेत्ये
तदनुवृत्त्यर्थः। ज्ञाननिर्मथनाभ्यासात्। ज्ञानस्य ॥१४॥

सर्वात्मकोऽहमस्मि। इत्येवंरूपस्य निर्मथनं युक्तिभिर्वि
लोडनं तस्याभ्यास आवृत्तिरूपो ज्ञाननिर्मथनाभ्या
सस्तस्मात्। उत्पन्ने नाहं ब्रह्मास्मीति सा ह्यकाराग्निना
पाशो। आत्मनो बंधरूपमज्ञानरचितमहंममादि
ग्रंथिं दहति। भस्मीकरोति। पंडितः। पंडाहं ब्रह्मास्मीति
बुद्धिस्तां इतः प्राप्तः। पंडितः। ननु अस्यास्य गोदासीनो
१स्या द्वितीयस्य कुतः संसारः पाशरूप इत्यत आह॥ सत्त्वेति॥
सत्त्व। उक्तौ संमोदासीन

१ जीवस्वरूपोपाधिभूतयात्मीयया परिमोहित इवात्मा बुद्धिद्वारा स
र्वं करोतीत्यर्थः ॥

कै.उ.दी. ॥१५॥ एवं स एवः मायापरिमोहितात्मा माया स्वविद्या आ
वरणविक्षेपकरी शक्तिः तया परिमोहितः स्वयंप्रका
श आनंदात्मा स्वस्वरूपोप्यस्य मायया परि
मोहितात्मा शरीरं स्थूलादिभेदभिन्नं मनुष्यादिक
लेवरं आस्थाय अहं मनुष्य इत्याद्यभिमानेन समंतात्
स्वीकृत्य करोति सर्वं निखिलं व्यापारजातं कुरुते ॥ ॥१५

स्त्र्यन्नपानादिविचित्रभोगैः स्त्रियो मनोनुकूला
युवत्यः अन्नपानं मनोनुकूलं आदिशब्देन संना वा
हनादीनि मनोनुकूलानि तैः स्त्र्यन्नपानादिविचि
त्रैर्भोगैः स्त्रग्वस्त्रान्नपानादिविचित्रभोगैः स्त्र्यन्ने
ति छांदसं स एव मायापरिसृष्ट एवं स एवः जाग्रत्
जागरणमिंद्रियैर्बाह्यविषयोपलब्धिरूपं कुर्वन् परि

२ मायापरिसृष्ट इव बुद्धिद्वारैव जा
ग्रज्जागरणं कुर्वन् प्राप्नोतीत्यर्थः २

४ स्वप्नेचेति
४ई

कै.उ.दी. ॥१६॥ न्नान्नंसर्वतोविषयसुखजातंतृप्तिःपरितृप्तिःस्त्रीणति
गच्छति।सुखंदुःखंचप्राप्नोतीत्यर्थः।इदानींस्वप्नसुषु
प्तोर्विहिपतस्त्रावकल्पनेनसंसारमोक्षयोर र्था
दृष्टांतमाह।स्वप्नेंद्रियग्रामोपरमरूपायांस्वप्नावस्था
यांजीवः।प्राणानांधारयिताविविधविषयवासनावा
सितः।सुखदुःखभोक्ता।सुखदुःखयोःप्रसिद्धयोर्भो ॥१६॥

क्ता।अहंसुखीअहंदुःखीत्येवंरूपप्रत्ययवान्।सुखदुः
स्वप्ने खभोक्ता।तच्चसंसारदृष्टांतेवास्तवत्वंवारयति।स्वमा
स्वप्ने यया।स्वस्यांतःकृतदेहाभिमानिनोमाया।अज्ञानंविप
रीतज्ञानंचतया।कल्पितविश्वलोके।कल्पितेवासनारू
पेविश्वस्मिन्नरथपरथयोगपंथ्यादिकेनिखिलेलोकेतु
वनेजनेचकल्पितविश्वलोके।स्वप्नेयथातज्जागर

कै. उ. दी. ॥१७॥ ऽपि तत्पर्थः सुषुप्तिकाले आनंदप्रयोगावसरे सकले
निखिले विलीने विशेषविज्ञाने स्वकारणे लयं गते एव सति
तां वस्तु सुषुप्तौ मोहे च समे ऽयं तु विशेषः तमोऽभिभू
तं सज्ञानात् तत्सुखरूपं स्वस्वरूपं स्वयंप्रकाशमा
नंदात्मकस्वरूपं एति गच्छति पुनश्च आनंदात्मस्वरू
पं प्राप्य न्ययोपि जन्मांतरकर्मयोगात् प्राक्तनवीयकर्मा ॥१७॥

नुसारात् स एव आनंदात्मस्वरूपं प्राप्त एव सुषुप्तिं
एव गतेँ न त्वन्यः जीवः प्राणविधारकः स्वपिति स्वभा
वस्थानं गच्छति सुषुप्तात् अथवा प्रबुध्यः प्रबोधं जाग
रणं प्राप्नोति वर्तीति विशेषः इदानीं जीवब्रह्मणोरैक्यमा
हँ पुरत्रये स्थूलसूक्ष्मकारणाख्ये शरीरत्रये क्रीडति
विहरति यस्मात् जीवः चकारेण वकारार्थः प्रसिद्धः पर यः
रपुरत्रयमिति

जीवः

वे·उ·टी· ॥१८॥ मात्मैवप्राणधारकः ततस्तस्मादेवजीवात्मिन्न ना
त्वन्यस्मात् जाते उत्पन्ने सकले निखिले विचित्रे वि
विधं कर्मनामरूपं विश्वं आधारे रज्जुरिव सर्पधारा
बलिवर्दसूत्रवत् सकलस्य विश्वस्याधारत्वं ते
आनंदं निरतिशयानंदस्वरूपं अखंड बोधं ज्ञा
नंस्वरूपत्वेपि स्वयंप्रकाशैकस्वभावं यस्मिन् ॥२८॥

२

अखंडबोधे स्वयं विनाशं यान्ति गच्छति पुरत्रयं व्या
ख्यातं बुद्ध्यादिदृश्यमपि एतस्मात् त्वया अधिष्ठानात्
बुद्ध्यादि जायते उत्पद्यते प्राणः क्रियाशक्तिः मनः
अंतःकरणं ज्ञानशक्तिः सर्वेंद्रियाणि च सर्वं कर्म णि
ज्ञानेंद्रियाणि अपि च शाश्वं देहादिकमपि खं न
भः नभस्वान् वायुः ज्योतिः तेजो धातुः आपः नी

१ देहधारणात्धातुः ।

के.उ.दी. राणि। पृथिवी भूमिः। विश्वस्य। निखिलस्य स्थावरजंगमा
॥१९॥ त्मकस्य प्राणिजातस्य धारिणी विधारिणी। इदानीम
हावाक्यार्थमाह। यत्। प्रसिद्धं। परं। उत्कृष्टं ब्रह्म। बृहद्दे
शकालवस्तुपरिच्छेदशून्यं। सर्वात्मा सर्वप्राणी हृदि
स्थितः सर्वनियन्ता। विश्वस्य सर्वस्य कार्यकारणजात
स्यायतनं। आधारभूतं महत्। प्रोष्ठं। सर्वाधारत्वेनैव ॥१९॥

स्स्मात्। अणुपरिमाणात्। तस्मात्तरं। महदप्यतिशये
दुर्विज्ञेयं नाणु। नित्यं विनाशशून्यं। तत्। उक्तं परं ब्रह्म। त्वमेव। तद्व
गतैव न त्वत्तोन्यत्। न तु तन्मत्तोन्यत्। अहं तु तस्मात्तो
मपि कर्तृत्वादिविशेषोपलेपादि। स तत्त्वमाह। त्वमेव
तत्। त्वं कर्ताभोक्तादिविषयावस्थतः। तत्परं ब्रह्मैव न त्व
मः। इदानीमेवं ज्ञाने फलमाह। जाग्रत्स्वप्नसुषुप्त्यादि

कै॰ उ॰ दी॰
॥२०॥

प्रपंचं । जाग्रत्स्वप्नसुषुप्त्यवस्थाः । तदाद्यो विश्वविरा
डादय एव प्रपंचो जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचः । तं यत्प्रसि
द्धं स्वयंप्रकाशं प्रकाशते प्रकाशयति । तत् । तत्के स्वयंप्रका उ
शं यत् । ब्रह्म सत्यज्ञानादिलक्षणं । अहं बलावगंता चि
दानंदात्मा इति । एवं प्रकारेण ज्ञात्वा साक्षात्कृत्य सर्वबं
धैः निखिलैर्बंधैः । अहंममाद्यैः । सकारणैः प्रमुच्यते ॥ २०
१सर्वै

२त्रिषु धामेति

प्रकोपेण मुक्तो भवति इदानीं सर्वस्मात्प्रपंचाद्वैलक्षण्य
माह । त्रिषु जाग्रत्स्वप्न सुषुप्तेषु धामसु स्थानेषु य
त्प्रसिद्धं भोग्यं स्थूलप्रविविक्ता नंदस्वरूपं । भोक्ता वि
श्वतैजसप्राज्ञाख्यः । भोगश्च स्थूलप्रविविक्तानंदभो
गोपि च बाह्याद्यधिदैवादिविभागोपि । यत् उक्तं त्रिधा
भोक्तृभोगरूपेण पंचज्जातं भवेत् । स्यात् तेभ्यस्त्रिधामा

कै·उ·दी· हिन्नः। विलक्षणं विपरीतलक्षणः। वैलक्षण्यमाह।
॥२१॥ साक्षी स्वाध्यस्तस्य विश्वस्य द्रष्टा। चिन्मात्रः। चिदेक
अहं रसः॥ अहं प्रत्ययव्यवहारयोग्यः। सदाशिवः। केवला नित्य
त्मा नित्यकल्याणरूपो महेश्वरः। प्रपंचवैलक्षण्यं
स्वस्यो क्त्वा इदानीं जगज्जन्मादिकारणत्वमपि
स्वस्याह। मय्येव मत्त एव ब्रह्माभिन्नात्मन्न तन्मस्मा ॥२१॥

१ मय्येवेति

सकलं निखिलं भूतभौतिकप्रपंचं जातं उत्पन्नं जातं१
मयि ब्रह्माभिन्ने सर्वं निखिलं विश्वं प्रतिष्ठितं॥ प्रक
र्षेण स्थितिं प्राप्तं। मयि सर्वं आरब्धात् लयं याति।
विनाशं गच्छति। तत्तस्मात्सर्वजगज्जन्मस्थितिध्वंसका ज
रणत्वात् ब्रह्म बृहद्देशकालवस्तुपरिच्छेदशून्यं॥ अ
द्वयं ज्ञानज्ञेयादिविभागशून्यमस्मि भवामि॥

ज्ञात१

कै॰उ॰दी॰
॥२२॥

अहं ब्रह्मणोव गंता। जगज्जन्मस्थितिध्वंसकारण
त्वात्। जगत्कारणत्वेन विकारित्वं प्राप्तं। तद्वेवा
तिदुर्बोधिस्वरूपत्वेन वारयति। अणोः। अणुपरि अणोरिति
माणात्। अणीयान्। अतिशयेनाणुः। अहमे
व जगत्कारणं। अहंप्रत्ययव्यवहारयोग्योनन्तंतुः।
तद्वत्। यथा अणुस्तथा महान्। सर्वस्मादप्यधिकः॥२२॥

अहं व्याख्यातं। अणीयसां महतां कारणानां च यथा
भेदस्तथात्रापि स्यादित्यत आह। विश्वं सविषयेन्द्र
तभौतिकप्रपंचजातं। अहं व्याख्यातं। अपरिमितो भे
दरहितः सर्वस्मादप्यभेदः स्यादित्यत आह। इदं विश्वं
विचित्रं विविधं स्वयमनंतभेदवदित्यर्थः। तदस्मिन्न जगत्
तथातत्वाप्याधुनीकत्वं स्यादित्यत आह। पुरात

कै.उ.दी. ॥२३॥

नः चिरंतनः । आधुनिकसर्पधारावलिवद्भूत्व
त्वाप्नि च्चाचिरंतनीरज्जुरिव । अहं व्याख्यातं पुरुषः
परिपूर्णो वस्तुतः । अहं व्याख्यातं । अविद्यातत्कार्ययो
ईशः नियंता नियंतृत्वसामर्थ्यमाह हिरण्मयः । हि
रण्मयो ज्ञानप्रचुरस्तत्प्रधानो वा । आदित्यस्थः स
र्वकार्यकारणात्मा । अहं व्याख्यातं शिवरूपंमंगल ॥२३॥

२ अपाणिपादइति ॥

स्वरूपं ब्रह्मास्मि भवामि । इदानीं सर्वकरणहीनस्य
सर्वज्ञता माह । अपाणिपादः । पाणिपादहीनः ।
अहं व्याख्यातं । अचिंत्यशक्तिः दुर्बोधशक्तिः एवं
भूतोऽपि जवनो ग्रहीतेत्यर्थः । पश्यामि । अवलोक
यामि । अचक्षुः चक्षुर्हीनः । सः अचक्षुः ईदृशः । शृ
णोमि श्रवणं करोमि । अकर्णः कर्णरहितः । अहं

ऽनेदेऽसतिकर्मत्वंकर्तृत्वंचस्यात्तथासतिवेद्यवेत्ताचेतिव्यवहारःसिध्येद्
ऽदाभावेकर्मकर्तृत्वाभावात्कूटस्थेनममवेत्तानास्त्येव २

कै. उ. दी. ॥ २४ ॥ व्याख्यातं ॥ विजानामि ॥ विविधं प्रपंचजातमवगच्छा
मि ॥ विविक्तरूपः बुध्यादिदृश्यपृथग्रूपः ॥ न चास्ति नास्त्ये
व वेत्ता कर्मकर्तृभावेनावगंता ॥ मम ॥ स्यानेदात्म
नोऽन्येदरहितस्य ॥ चित्स्वयंप्रकाशबोधस्वभावः
सदाऽसर्वदा ॥ अहं व्याख्यातं ॥ इदानीं सर्वशास्त्रप्र
तिपाद्यस्यात्मनः सर्वविकाराभावं दर्शयति ॥ २४ ॥
१ वेदैरिति ॥

श्री वेदैः ऋग्वादिभिः ॥ अनेकैः बहुभिः ॥ अहं ॥ व्याख्यातं ॥ वे मेव
द्यः प्रतिपाद्यः ॥ वेदांतकृत् ॥ वेदांतस्य कृत् ॥ वेदस्वा
स्वरूपः ॥ वेदविदे ॥ व च वेदांतकृतो विशेषणं
वेदांतानां संगमनं सामान्यविषयास्थानानां वे
त्ता वेदवित् ॥ स एव न त्वन्यः ॥ च शब्दादनेकतपः
संपन्नश्च ॥ अहं व्याख्यातं ॥ ऽनेन विभूतिमस्य

कै॰उ॰दी॰ ।।२५।। तेष्वहमेवप्रधानमित्युक्तं ।नपुण्यपापेममनस्पृष्टंस्त
इतिशेषः ।नास्तिनाशः ।विनाशेननविद्यतेममेत्य
नुषंगः ।नजन्मजननिर्ममनास्तीत्यनुषंगः ।देहेंद्रि
यबुद्धिः ।देहश्चेंद्रियाणिचबुद्धयश्चदेहेंद्रियबुद्धिः
नास्तिनविद्यतेममइत्यनुषंगः ।नभूमिरापोम
म ।इत्थीसोरकाममनास्तीत्यनुषंगः ।वह्निःप्र २५

सिद्धः ।नास्तिममेत्यनुषंगः ।नचानिलोमेस्तिवायुर
पिममनविद्यते ।चकाराद्वाय्वीयं कार्यमपि ।नचां
बरंच ।आकाशमपिनममनास्तीत्यनुषंगः ।चका
का राद्वांराकार्यंतद्व्यतिरिक्तोक्तानुक्तानुनावार्थो ।एवं
उक्तेनप्रकारेणविदित्वासाक्षात्कृत्य ।परमात्म
रूपंसूक्ष्मानंदात्मस्वरूपं ।गुहाशयंबुद्धौशयानं

कै॰उ॰दी॰ ॥२६॥

निष्कलं निर्गताः प्राणश्रद्धाखंवायुर्ज्योतिरापःपृथिवींद्रि
द्रिय मनोन्नवीर्यतपोमंत्रकर्मलोकनामाख्याः क
लास्तं अद्वितीयं सजातीयविजातीयद्वितीयवस्तु
शून्यं समस्तसाक्षिं समस्तसाक्षिणं सर्वद्रष्टारं स
दसद्विहीनं भावाभावविवर्जितं तदेवनिरवद्यंग
च्छतीत्याह प्रयातिशुद्धं परमात्मरूपंस्पष्टं एवंत्र ॥२६॥

२तार्किकैः षड्भावाएकोऽभावएवंसप्तपदार्थाः स्वीकृतास्तैर्वर्जितं२

१सुरापानात्।मदिरापानान्महापातकदोषात्।पूतः।व्याख्यातं।भवति।स्पष्टं।ब्रह्महत्यात्।ब्रह्महत्यायाः ब्रह्महत्यारूपान्महापातकदोषात्।पूतः।व्याख्यातं।भवति।स्पष्टं।हत्याहत्यात्।कृत्यकरणीयं

ते परमात्मानं प्रतिपत्तुमश[illegible]क्तस्याशुद्धांतःकर
णस्यां[illegible]तःकरणशुद्ध्यर्थमाह यःप्रसिद्धोमुमुक्षु यःशतेनेति२
रनुतप्तमसाक्षात्कारः शतरुद्रियं नमस्त इत्यादिरु
द्राध्यायं अधीते पठति [illegible] यथाशक्ति नित्यं
सः शतरुद्रियाध्यापकः अग्नि[illegible]पूतः अग्निनिःश्रौतैः
स्मार्त्तैः पवित्रीकृतोग्निपूतः भवतिस्पष्टं ऽरा तरुडि

२अधीयते सोऽध्यायकः

बुद्धिपूर्वकं पापं अकृत्यमबुद्धिपूर्वकं पापं तस्मात् पूतः।व्याख्यातो।भवति।स्पष्टं।तस्मात्।

कै·उ·दी· ॥२७॥

याध्ययनात् ॥ अविमुक्तं विरुद्धत्वेन मुक्ताः विमुक्ताः
पशवः तेभ्यो अतिरिक्तो विमुक्तः पशुपतिः तं ॥ आश्रि
तो भवति स एव अत्याश्रमी ॥ अत्याश्रममुक्तः पारम
हंसः तल्लक्षणः स यस्मात्त्रिसोत्याश्रमी सर्वदा निरंत
रं सत्कर्ता कदाचित् दिवसे दिवसे एकवारमित्यर्थः
वाराहशेधिकारिसामर्थ्यानुसारेण अवस्थित विक्र २७

त्यार्थः ॥ अनेन रुद्राध्यायजपेन ज्ञानेन ब्रह्मं हंस्मास्मीति सा
क्षात्काररूपं ॥ आप्नोति प्राप्नोति ॥ संसारार्णवनाशनं सं
सारसागरस्य शोषणं यस्मात् रुद्राध्यायजपो शेषपाप
निवर्हण द्वारा ब्रह्मज्ञानहेतुः तस्मात् ततः ॥ एवं [illegible] त
उक्तेन प्रकारेण त्रिनेत्र ध्यानरुद्राध्यायाध्ययनादि
ना विदित्वा साक्षात्कृत्य ॥ एनं परमात्मानं कैवल्यं

कै॰ उ॰ दी॰ ॥२८॥

केवलस्यात्मनोभावः कैवल्यं।तत्फलंपुरुषाभिलाष
विषयंसर्वपुरुषार्थसमाप्तिभूतं।अश्नुतेप्राप्नोति।
कैवल्यंफलमश्नुते॥इतिव्याख्यातं।पदाभ्यासउप
निषदर्थसमाप्त्यर्थः॥ ॥इतिश्रीमत्परमहंसपरिव्रा
जकाचार्यगोविंदात्मपूज्यपादशिष्यस्यशंकराचा
र्यभगवतःकृतिःकैवल्योपनिषद्दीपिकासमाप्ता॥ ॥२८॥